International Journal of Sanskrit Research 2024; 10(2): 168-170

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 168-170
© 2024 IJSR
www.anantaajournal.com
Received: 07-01-2024
Accepted: 10-02-2024

**गवेषिका**
पूर्णिमा-हालदारः, कलिकाता-विश्वविद्यालयः, कोलकाता , पश्चिम बंगाल, भारत

# विश्वेश्वरविद्याभूषणप्रणीतनाटकत्रये अहिंसातत्त्वम्

**गवेषिका**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i2c.2349

**सारसंक्षेप**

आधुनिकसंस्कृतसाहित्यस्य ऊनविंशशतकीयः विशिष्टः कविः नाट्यकारश्च विश्वेश्वरविद्याभूषणः। न केवलं नाट्यकाररूपेण अपि तु सङ्गीतज्ञरूपेणापि अनवद्यः आसीत्। स्वाधीनोत्तरभारतवर्षे संस्कृतचर्चा शिथिलीजाता। साधारणजनैः काठिन्यवशादनङ्गीकारात् काभिश्चित् श्रेणिभिः सा भाषा सीमाबद्धा जाता। तां सीमामुल्लङ्घयितुमचेष्टत श्रीविद्याभूषणमहोदयः। सः रामायण-महाभारत-पुराणैतिहासिकवृत्तान्तान् सरलभाषया माधुर्येण साधारणाय निवेदितवान्। रामायणमहाभारतयोः वृत्तान्तस्वीकारे अन्यतमं कारणं तु स्वाधीनोत्तरभारतवर्षीयजनजीवनस्य प्रतिच्छविप्रदर्शनम्। पारस्परिकहिंसा-द्वेषाक्रान्ताः वङ्गीयाः विपर्यस्ताः एव आसन्। तादृशं कालखण्डमुद्दिश्य एव रामायणकेन्द्रिकं 'वाल्मीकिसम्बर्धनम्', महाभारताश्रितम् 'उत्तरकुरुक्षेत्रम्', देशप्रेममूलकञ्च 'प्रबुद्धहिमाचलम्' इति नाटकत्रयम्। नाटकत्रयाणां मूलवार्ता एव अहिंसा-शान्ति-मैत्रीस्थापनञ्च। नाट्यत्रयेण नाट्यकारः सर्वेषु अहिंसां जागरितवान्। रुधिरक्षये प्रतिहिंसायां नास्ति शान्तिः, त्यागेन तितिक्षया प्रेम्णा मैत्र्या च तत्प्राप्यते इत्येव ज्ञापनं तस्य मुख्यमुद्देश्यमासीत्। तत् 'वाल्मीकिसम्बर्धनम्' इति नाटके दस्योः रत्नाकरस्य जीवनपरिवर्तनेन उद्घोषितम्। किञ्च 'उत्तरकुरुक्षेत्रम्' इति नाटकेन नाट्यकारः विद्याभूषणमहोदयः प्रदर्शितवान् यत् युधिष्ठिरः कुरुराज्यं जीत्वापि आत्मीयानां परलोकगमनेन विचलितः सन् शान्तिस्थापनाय अचेष्टत। 'प्रबुद्धहिमाचलम्' इति नाटके दृश्यते यत् युद्धे विपर्यस्ताः आश्रयहीनाः शोकातुराः युद्धं त्यक्त्वा शान्तिं कामयन्ति। एवं वृत्तान्तवर्णनेन नाट्यकारः बोधयितुमचेष्टत यत् द्विशतवर्षं व्याप्य पराधीनोत्तरं स्वाधीनतां प्राप्य मुक्तानां भारतीयानां देशविभागरोगाक्रान्तानां रुधिरस्नातानां शान्तिं विहान नान्यत् किमपि काम्यमवशिष्टम्। अहिंसा अर्थात् शान्तिरेव मानवतायाः मूलधर्मः। एवम् अहिंसातत्त्वस्य जागरणं प्राचीनभारतीयैतिह्यस्य संस्कृतेः, शासनव्यवस्थायाः, राजनैतिकध्यानधारणायाश्च ज्ञापनमेव नाट्यकारस्य विद्याभूषणमहोदयस्य रचनायाः मूलमुद्देश्यम्। तस्मात् प्रबन्धेऽस्मिन् नाटकत्रमाश्रित्य अहिंसातत्त्वमलोचयितुं चेष्टितम्।

**कुटशब्दः** आधुनिकसंस्कृतनाटकम्, विश्वेश्वरविद्याभूषणः, वाल्मीकिसम्बर्धनम्, उत्तरकुरुक्षेत्रम्, प्रबुद्धहिमाचलम्, विषयवस्तु, अहिंसातत्त्वम्

## प्रस्तावना

सभ्यतायाः महदुपकरणं भाषा। या न केनापि पण्डितेन सृष्टा। मनुष्याः एव सामग्रिकरूपेण भाषायाः स्रष्टारः, मनुष्याः एव स्वपरिसरे हिंसायाः परिवेशं निर्मान्ति। 'अहिंसा' इति शब्दविश्लेषणेन न हिंसा अर्थात् हिंसाहीनता इत्यर्थः आगच्छति। एताम् अहिंसावार्तामाश्रित्य एव युगे युगे बहूनि साहित्यानि बह्व्यः रचनाः मानवसृष्टिं समृद्धयामासुः। ऊनविंशशतकीयः विशिष्टः वङ्गीयनाट्यकारः विश्वेश्वरविद्याभूषणः। तेन रचितेषु बहुषु नाटकेषु रामायणमूलकं नाटकं 'वाल्मीकिसम्बर्धनम्', महाभारताश्रितं नाटकं 'उत्तरकुरुक्षेत्रम्' देशप्रेममूलकं नाटकञ्च 'प्रबुद्धहिमाचलम्'। नाट्यत्रयेष्वेव अहिंसातत्त्वमालोचितम्। यथा 'वाल्मीकिसम्बर्धने' दस्युरत्नाकरः केन प्रकारेण हिंसां परित्यज्य अहिंसामार्गमवलम्ब्य वाल्मीकिरूपेण परिवर्तितः जातः। यथा वा 'उत्तरकुरुक्षेत्रे' युद्धपरवर्तिकाले पाण्डवाः अहिंसामवलम्ब्य एव कथं राज्यपरिचालनमकुर्वन्। 'प्रबुद्धहिमाचले' च स्वदेशे शान्तिस्थापनाय देशप्रेमिणां निःस्वार्थरूपेण आत्मबलिदानम्। एतानि नाटकानि केनचित् नाटकेन वृत्तान्तेन वा प्रभावितानि। यथा 'वाल्मीकिसम्बर्धनम्' इति नाटके विश्वकवेः रवीन्द्रनाथस्य 'वाल्मीकिप्रतिभा' 'कालमृगया' चेति नाटकयोः प्रभावः दृश्यते। 'उत्तरकुरुक्षेत्रम्' इति नाटकं यद्यपि महाभारतवृत्तान्तमूलकं तथापि नाट्यकारः स्वकल्पितविषयानां संयोजनं कृतवान्। स्वाधीनताकालीनभारतवर्षस्य परिस्थित्या, देशप्रेमिणामात्मबलिदानेन च प्रभावितः नाट्यकारः 'प्रबुद्धहिमाचलम्' इति नाटकं व्यरचयत्।

## उद्देश्यम्

प्रबन्धस्यास्य मुख्यमुद्देश्यं तु नाट्यकारस्य विद्याभूषणमहोदयस्य नाट्यनैपुण्येन सह जगति अहिंसावार्तासम्प्रसारणप्रयासं युगोचितरूपेण समस्तगवेषकसविधे साहित्यचर्चाङ्गने च प्रतिष्ठापनम्।

**Corresponding Author:**
**गवेषिका**
पूर्णिमा-हालदारः, कलिकाता-विश्वविद्यालयः, कोलकाता , पश्चिम बंगाल, भारत

**कार्यप्रणाली**

आलोच्येऽस्मिन् प्रबन्धे मूलग्रन्थेन सह रामायण-महाभारतयोः रवीन्द्रनाथस्य 'वाल्मीकिप्रतिभा' 'कालमृगया' चेति ग्रन्थयोश्च साहाय्यमङ्गीकृतम्। एतदतिरिच्यापि प्रबन्धसहायकाः ग्रन्थाः विविधग्रन्थालयेभ्यः संग्रहीताः।

**कविपरिचयः**

१९०३ ईशवीयाब्दे बङ्गदेशस्य चट्टग्रामजनपदस्य खितापचरस्य एकस्मिन् पण्डितवंशे जातः कृष्णकान्त-कृतिरत्नस्य पुत्रः विशिष्टसंस्कृतज्ञः पण्डितः अध्यापकः विश्वेश्वरविद्याभूषणः कलिकातायां राजेन्द्रनाथविद्याभूषणात् शिक्षां लब्ध्वा चट्टलसंस्कृतमहाविद्यालयात् अध्ययनादनन्तरं कलिकाताविश्वविद्यालयात् स्नातकोत्तरमध्ययनं कृतवान्। चट्टलसंस्कृतमहाविद्यालये अध्यापनात् अनन्तरं पश्चिमबङ्गसर्वकार्येषु विविधविद्यालयेषु संस्कृतस्य प्रधानशिक्षकरूपेण कार्यं निर्वहन् संस्कृतभाषायाः प्रचारं कृतवान्। तेन संस्कृतेन बङ्गभाषया आङ्गलभाषया च बहूनि नाटकानि, काव्यानि, खण्डकाव्यानि, कथासाहित्यानि, प्रबन्धाः च विरचिताः। तेन रचितानि बहुनि गीतानि 'आकाशवाणी' इत्यस्मात् संस्थानात् प्रचारितानि। किञ्च, सङ्गीतज्ञरूपेण सः दिल्ली-साहित्य-एकादेमि इति संस्थानात् पुरस्कृतः। तेन रचितानि नाटकानि प्रधानतया संस्कृतभायामपि रूपकाश्रितानि। राजसभायाः नाटकेभ्यः तेन रचितानि नाटकानि स्वतन्त्राणि। वैदेशिकनाट्यशास्त्रेण वैदेशिकनाटकैश्च तन्नाटकानि प्रभावितानि। आलोच्यनिबन्धे तेन रचितानां नाटकत्रयाणामहिंसातत्त्वमालोचितम्। १९८५ ईशवीयाब्दे तेषां जीवनावसानं जातम्।

**नाटकत्रयाणां संक्षिप्तविषयः**

**वाल्मीकिसम्बर्धनम्** – नाटकस्यास्य मूलः विषयस्तावत् दस्युरत्नाकरस्य तपस्यया सर्वपापमुक्तेः महर्षिवाल्मीकिरूपेण परिवर्तनम्। सरलया भाषया नाट्यकारः विद्याभूषणमहोदयः नाटकेनानेन कलुषनिपीडितमानवात्मनः बन्धनमुक्तेः इतिहासं प्रकाशयितुमचेष्टत। कठोरतपस्यायामात्मोत्सर्गेन साधुसङ्गेन च मर्त्येऽपि अमृतत्त्वं लभ्यते, साधनया एव मानवजीवनं पूर्णं स्यात् इत्यादिविषयाः नाटकेऽस्मिन् आलोचिताः।

**उत्तरकुरुक्षेत्रम्:** महाभारतस्य शान्तिपर्वणि वर्णितां कुरुपाण्डवानां युद्धोत्तरघटनां समाश्रित्य कविः स्वप्रतिभया विविधकाल्पनिकविषयान् संयुज्य आलोच्यं नाटकं विरचितम्। उत्तरकुरुक्षेत्रम् इतीदं नाटकं महाभारताश्रितं कुरुक्षेत्रयुद्धानन्तरं विशिष्टघटनावलम्बितं पञ्चाङ्कविशिष्टम्। युद्धक्षेत्रे आत्मीयानां स्वजनानां बन्धुनां च मृत्युदर्शने अर्जुनस्य विलापः, श्रीकृष्णस्य अर्जुनाय सान्त्वनाप्रदानं, श्रीकृष्णेन सह पञ्चपाण्डवानां हस्तिनापुरे प्रवेशः, अभिमन्युपुत्रपरीक्षितस्य राज्याभिषेकः, नारदाभिशापेन यदुवंशध्वंसः श्रीकृष्णस्य मृत्यु च, द्वारकापुरीध्वंसः, श्रीकृष्णस्य देहनाशे युधिष्ठिरस्य अर्जुनस्य च विलापः, द्रौपद्या सह पाण्डवानां सन्न्यासजीवरग्रहणं, परीक्षितं प्रति शृङ्गीमुनेः अभिशापः, तक्षकसर्पदंशनेन तस्य मृत्युः, सर्पकुलध्वंसार्थं परीक्षितपुत्रजनमेजयकर्तृकसर्पसत्रयज्ञः, जनमेजयं प्रति सर्पकुलस्य कृते आस्तिकमुनिकर्तृकप्राणभिक्षा, जनमेजयस्य यज्ञसमाप्तिः, सर्पकुलस्य प्राणदानम् इत्यादयः नाटकस्य मूलविषयाः।

**प्रबुद्धहिमाचलम्:** नाटकस्य अस्य प्रधानम् उपजीव्यं तावत् स्वाधीनोत्तरस्य भारतवर्षस्य विविधार्थसामाजिकसमस्याः। विशालपुराधिपतिना विक्रमवर्धनेन देवस्थानपुरस्य आक्रमणे कृते महाराजविजयकेतोः किञ्च सम्मिलितदेशवासीनां प्रचेष्टया अपि च देशप्रेमिनः सनातनस्य आत्मत्यागेन देवस्थानपुरस्य जयप्राप्तिः एव नाटकस्य मूलविषयः।

**नाटकत्रये अहिंसातत्त्वस्य विश्लेषणपूर्वकमालोचनम्** –

**वाल्मीकिसम्बर्धनम्:** दस्युरत्नाकरस्य महर्षिवाल्मीकिरूपेण परिवर्तनरूपवृत्तान्तं नाटकेऽस्मिन् प्रदर्शयितुमचेष्टत नाट्यकारः। एतेन नाट्यकारः बोधयितुमचेष्टत यत् मनुष्यः सदिच्छया हिंसां परित्यज्य अहिंसामार्गे अग्रसरः सन् जीवनम् आमूलचूडं परिवर्तयितुं शक्नोति। नाटके प्रतिपादितं यत् दस्युरत्नाकरः तपस्यया केन प्रकारेण स्वान्तःकरणं स्थिर्यकरोत्। कामनाभ्यः आत्मानं विमोच्य महर्षिरूपेण परिवर्तयितुमशक्नोत्। एतेन नाट्यकारः बोधयति यत् मनुष्यः यदि स्वान्तःकरणं स्थिरीकरोति तर्हि बहु आयाससाध्यं कार्यमपि अनायासेन साधयितुं शक्यते। हिंसा अन्तःकरणं दग्धीकरोति। तथाहि, यदा रत्नाकरः दस्युः आसीत् तदा तस्य मूलमुद्देश्यमासीत् मनुष्यपीडनं, हिंसा, लुण्ठनमित्यादिकार्यम्। हिताहितज्ञानस्यावशेषमपि नासीत् तस्मिन्। परन्तु यदा अहिंसामार्गमवलम्ब्य महर्षिरूपेण परिवर्तितः जातः तदा रामायणरूपपुण्यग्रन्थरचनया 'आदिकविः' इत्युपाधिमलभत, देव्याः सरस्वत्याश्च आशीः प्राप्तवान्। नाट्यकारः दस्युरत्नाकरस्य जीवनपरिवर्तनवृत्तान्तेन सर्वेभ्यः अहिंसामार्गावलम्बनाय उपदिदेश।

नाटकमिदं कियन्मौलिकमित्यपि आलोचनीयम्। यद्यपि नाट्यकारः रवीन्द्रनाथेन प्रभावितः आसीत् तथापि बहुत्र प्राचीनसंस्कृतनाटकरीत्याः प्रयोगेन तन्मर्यादामपि अक्षुण्णं स्थापितवान्। अतः वक्तुं शक्यते यत् नाटकमिदं प्राचीनाधुनिकनाट्यधारायाः सेतुरूपेण आत्मानं प्रकाशयति।

**उत्तरकुरुक्षेत्रम्:** नाटकमिदं महाभारतस्य युद्धपरवर्तिकालीनघटनाः आश्रित्य रचितम्। तस्मात् अत्र युद्धे विपर्यस्तानां, शोकातुराणां, युद्धाक्लान्तानां हृदयाकुतिः शान्तिरेव इति वर्णितम्। नाटके दृश्यते यत् पुत्रशोके कातरे धृतराष्ट्रगान्धार्यौ शिष्टं जीवनमरण्यव्रतपालनेन अतिवाहितुमिष्टवत्यौ।[1] नाटकस्य प्रथमे नान्दीश्लोके दृश्यते यत् भगवान् विष्णुः 'कालिन्दीकुञ्जचारी', 'शान्तमूर्तिः', 'दिव्यगीताप्रचारी' इत्यादिविशेषणैः अहिंसाप्रतीकरूपेण चित्रितः।[2] किञ्च, नाटकस्य प्रथमाङ्के हस्तिनापुरस्य कुलदेवीं भद्रकालीं सम्पूज्य सर्वेषां शान्तिः प्रीणिता।[3] युधिष्ठिरादयः पञ्च भ्रातरः परीक्षिते राज्यभारं समर्प्य द्रौपद्या सह सन्न्यासग्रहणपुरःसरमहिंसामार्गमेव अवलम्बितवन्तः। नाटकस्य पञ्चमाङ्के तपोवनस्य शान्तिपूर्णः परिवेशः दृश्यते यत् मनुष्यजीवनस्य कोलाहलात् बहुदूरमवस्थितः। तत्र पशुमनुष्ययोः हिंसाविहीनः आन्तरिकः सम्बन्धः भृशं दृश्यते।[4] राजा परीक्षितः शृङ्गीमुनिना अभिशप्तः सन्नपि शमीकमुनेः आशिषा शापमुक्तये अहिंसामार्गावलम्बनेन दानादिना हरिकथाश्रवणेन भक्तिमार्गमवलम्बन् जीवनमतिवाहितवान्।[5] नाटकस्य परिशेषे दृश्यते यत् जनमेजयः पितृप्रतिशोधे उद्युक्तः आस्तिकमुनेः आदेशेन शान्तः सन् राजकर्तव्यानुसारेण सर्पकुलं प्राणं प्रत्यर्पयत्।

परिशेषे वक्तुं शक्यते यत् कुरुक्षेत्रयुद्धे पाण्डवानां जयेन कौरवाणां पराजयेन विद्याभूषणमहोदयः स्पष्टीचकार यत् शौर्यवीर्यमाहात्म्यैः जयः लभ्यते, नीतिहीनता-लोभाधर्म-हिंसाद्याः मनुष्यान् पराजयेन न्यक्कुर्वन्ति। द्वारकायाः विसर्जनेन यादवानां ध्वंसवर्णनया च ज्ञापितवान् यत् हिंसा मनुष्यजीवने विनाशमाह्वयति। नाटके विविधहिंसारहितवाक्यैः नाट्यकारः सर्वान् अहिंसामार्गावलम्बनाय उपदिदेश, नीतियुक्तवाक्यैश्च आत्मचेतनां जागरयित्वा नूतनदेशनिर्माणाय आहुतवान्।

**प्रबुद्धहिमाचलम्:** देशप्रेममूलकं नाटकमिदमैतिहासिकपटभूमिकामाश्रित्य रचितं नास्ति विषयेऽस्मिन् सन्देहलेशः। नाटकस्य पाठे अनुभूयते यत् नाटकमिदं स्वाधीनताकालस्य प्रतिच्छवि, यतो हि नाटकस्यास्य प्रारम्भे भारतमातुः स्तुतिः दृश्यते।[6] अपि च देशप्रेममूलघटनाः अस्य मुख्यविषयाः। नायकस्य विजयकेतोः शासनेन, प्रजानुरञ्जकतया च यथा सुशासकस्य चित्रं यथा परिस्फुटितं तथैव

---

[1] "वार्द्धक्ये अरण्यव्रतमेव कुरूणां साधनीयम्" (उ.कु, विद्याभूषणः, सम्पा. – ध्यानेश-नारायण-चक्रवर्ती, पृ. - ११)

[2] "कालिन्दीकुञ्जचारी नवघनरुचिरः श्यामल शान्तमूर्तिः
यः कंसध्वंसकारी कुरुकुलसमरे दिव्यगीताप्रचारी।
प्राणानन्दः प्रमूर्तः सुर-नर-रमणो गोपिकाचित्तचारी
सोऽयं पायाच्चिरं वस्त्रिभुवनशरणं पापहारी मुरारिः॥" (प्रस्ता/१) (तत्रैव, पृ.-१)

[3] "ॐ भद्रकालि मयामाये सर्व्वमङ्गलदायिनि, कुरुकुलेश्वरि देवि, नमस्ते रक्ष नः सुतान्।" (तत्रैव, पृ. - १२)

[4] "परं शान्तिमयमेतत् काननम्। अत्र सुरभिवनवाताः प्रवहन्ति, चित्तं विनोदयन्ति च कलसङ्गीतैर्निर्झरकल्लोलाः" (तत्रैव, पृ. - ३३)

[5] "तुलसीकाननं यत्र यत्र पद्मवनानि च।
पुराणपठनं यत्र तत्र सन्निहितो हरिः॥" (५/३) (तत्रैव, पृ.- ३८)

[6] "उद्यत्स्वर्णकरोज्ज्वलाद्रिमुकुटां नीलाब्धिनीराञ्चलां
श्यामां काननकुन्तलां च ललितां पुण्यप्रभाशीतलाम्।
काशी-वङ्ग-कलिङ्गमद्रसहितां सौराष्ट्ररम्यस्थलां
वन्दे भारतमातृकां सुवरदां गङ्गासरिन्मालिनीम्॥" (प्रस्ता/२) (प्र.हि, विद्याभूषणः, सम्पा. – ध्यानेश-नारायण-चक्रवर्ती, पृ.- १)

प्रतिनायकस्य विक्रमवर्धनस्य राज्यशासनेन आङ्गलशासकानां कुशासनस्य प्रतिच्छविः परिस्फुटिता। एवं परस्परविरुद्धचरित्राभ्यां नाट्यकारः वर्तमानसमाजे प्रकृतशासकस्य परिचयप्रदानपूर्वकम् आङ्गलशासनव्यवस्थाः कुप्रभावं संस्मारितवान्। येन भाविनि काले भारतीयाः पाश्चात्यशासनाधीनतायाः दूरं तिष्ठेयुः। नाटके नारीणां साहसस्य, सहानुभूतिशीलतायाः, ऐक्यस्य यः परिचयः प्राप्यते तेन स्वाधीनतायुद्धे आत्मवलिदानकारिणां मातङ्गिनीहाजरा-लक्ष्मीवाईप्रमुखनारीशक्तिनां वीरगाथां स्मारयति। नाटके वर्णिता दिव्यज्योतिर्मयी नारीमूर्तिः भारतमातृस्वरूपा। देवस्थानपुर-विशालपुरयोः युद्धेन क्षतानामाश्रयहीनानां जनानां वृत्तान्तः स्वाधीनतोत्तरकालीनभारतवर्षस्य चित्रं स्पष्टीकरोति। अनेन वर्णनेन नाट्यकारः 'न युद्धं शान्तिरीष्यते' इति वार्ता प्रसारिता। नाटके वर्णिता सनातनस्य आत्मगाथा महद्गुरुत्वमावहति। वीरः सनातनः स्वदेशवासीनां मङ्गलार्थं दुर्गमहिमालययात्रां कृत्वा वेदभारतीमन्दिरे मातुः समक्षं स्वेच्छया आत्मजीवनस्य वलिं चकार। तेन एकान्ततया युद्धं समाप्य शान्तिरिष्टा। सनातनस्य आत्मत्यागवृत्तान्तः तादृशान् वीरभारतीयान् स्मारयति ये आङ्गलशासनात् भारतं भारतवास्तव्यान् च मुक्त्वा हिंसाविहीनशान्तिपूर्णदेशनिर्माणाय स्वजीवनं तृणीकृत्य आत्मवलिं ददुः।

परिशेषे वक्तुं शक्यते यत् रूपकाश्रितेन नाटकेनानेन नाट्यकारः स्वाधीनताकालीनमनुष्याणां वञ्चनायाः इतिहासं रचितवान्। ततः च आत्मानं मोचयितुं सर्वैरैक्यबद्धैः अहिंसामार्गगामिभिः नूतनदेशनिर्माणाय भवितव्यमिति उद्घोषितवान्।

## उपसंहार

ऊनविंशशतके रचितानि विविधसंस्कृतनाटकानि न केवलं पाठ्यपुस्तके सीमाबद्धानि आसन्। नाट्यकाराः एतेषां नाटकानामभिनयेन सर्वेस्मै उपस्थाप्य सर्वान् मूलविषये सचेतनं कृतवन्तः। स्वाधीनोत्तरभारतवर्षस्य परिस्थितिः भारतीयानां जनजीवने विशेषप्रभावमविस्तारयत्। अन्नवस्त्रवासस्थानानां सङ्कटेन सह दारिद्र्य-क्षुधा-निर्जीविकत्वानां सङ्कटः सहस्थानमलभत। तदा केचन नाट्यकाराः स्वलेखन्या मनुष्याणामात्मचेतनां जागरयितुमचेष्टत। ते पण्डिताः रामायण-महाभारत-वेद-पुराणेभ्यः मूलविषयं संगृह्य सरलया भाषया प्रकाशयितुमचेष्टन्त। तेषां मूलमुद्देश्यं तु अशान्तान्तःकरणस्य सान्त्वनम्, अहिंसामार्गे सम्प्रेषणम्, ऐक्यं संस्थाप्य नवीनदेशनिर्माणे प्रोत्साहनम्। यथा 'वाल्मीकिसम्बर्धनम्' इति नाटके नाट्यकारः चेतनाश्रिताहिंसायाः नाट्यरूपं प्रदत्तवान्। नाटकेऽस्मिन् प्रत्येकं चरित्रं रामायणाश्रितं रवीन्द्रभावाश्रितं च। दस्युरात्नाकरस्य चारित्रिकपरिवर्तनस्य, वाल्मीकिरूपेण चरित्रोत्तरणस्य द्योतनेन नाट्यकारः बोधितवान् यत् हिंसया जागतिकसुखं यद्यपि प्राप्यते तथापि आत्मसुखलाभाय त्यागतितिक्षायाः प्रयोजनमस्त्येव। आवहोः कालात् तदेव प्रचलति। 'उत्तरकुरुक्षेत्रम्' इत्यनेन नाटकेनापि नाट्यकारः सर्वस्मै युद्धात् विरताः भवितुमपदिदेश। विविधवर्णनाभिः मनुष्यान् प्राचीनसभ्यताविषये परिचयं प्रदाय सन्मार्गावलम्बनाय आदिदेश। शान्ततपोवनस्य वर्णनया, ऋषिणां यज्ञवर्णनया, मनुष्यविहगयोः आन्तरिकसम्पर्कस्य वर्णनया च शान्तिपूर्णपरिवेशगठनाय आहुतवान् मनुष्यान्। एतदतिरिच्यापि युधिष्ठिरस्य शासनव्यवस्था, परीक्षितस्य भक्तिमार्गावलम्बनम्, जनमेजयस्य राजकर्तव्यपालनं प्रभृतिवर्णनाभिः नाट्याकारः शान्तिपूर्णरामराज्यस्य वार्तां स्मारितवान्। देशप्रेममूलकेन 'प्रबुद्धहिमाचलम्' इति नाटकेन नाट्यकारः पराधीनतामुक्तेभ्यः भारतवासिभ्यः गुरुत्वपूर्णां सतर्कवार्तां निवेदितवान्। तन्नये प्रतियुगं वैदेशिकैः स्वदेशिकैर्वा पराधीनाः सन्तः अत्याचारिताः स्वदेशीयाः। बहिश्शत्रोः अत्याचारः समाप्यते, परन्तु अन्तःशत्रोः अत्याचारः मर्मान्तिकः। तस्मात् नाट्यकारः निवेदितवान् यत् अधिकाररक्षार्थं सचेतनैः ऐक्यबद्धैः अहिंसकैः साहसिकैश्च भाव्यमस्माभि। किञ्च, त्यागतितिक्षासाधनासु एव भारतीयानां गौरवं गोपायितं विद्यते। 'একদিন ঝড় থেমে যাবে, পৃথিবী আবার শান্ত হবে', 'বরিষ ধরার মাঝে শান্তির বাণী' – इत्यादिकविगुरुप्रार्थनासङ्गीतवत् नाट्यकारस्य भरतवाक्ये देवीवन्दना ध्वनिता। अर्थात् वक्तुं शक्यते यत् सामाजिकहिंसायाः प्रतिरोधाय अहिंसा एव एकान्ततया काम्या।

## संदर्भसूची


1. विश्वेश्वरविद्याभूषणः। उत्तरकुरुक्षेत्रम्। सम्पा. ध्यानेश-नारायण-चक्रवर्ती। कलिकाता : संस्कृतपुस्तकभाण्डारः, १९६८ (प्रथमसंस्करणम्)।
2. विश्वेश्वरविद्याभूषणः। काव्यकुसुमाञ्जलिः। सम्पा. ध्यानेश-नारायण-चक्रवर्ती। कलिकाता : संस्कृतपुस्तकभाण्डारः, १९७९ (प्रथमसंस्करणम्)।
3. विश्वेश्वरविद्याभूषणः। प्रबुद्धहिमाचलम्। सम्पा. ध्यानेश-नारायण-चक्रवर्ती। कलिकाता : संस्कृतपुस्तकभाण्डारः, १९६९ (प्रथमसंस्करणम्)।
4. विश्वेश्वरविद्याभूषणः। वाल्मीकिसंवर्धनम्। सम्पा. ध्यानेश-नारायण-चक्रवर्ती। कलिकाता : संस्कृतपुस्तकभाण्डारः, १९६६ (प्रथमसंस्करणम्)।
5. घोषाल, वनविहारी। २०२१ (प्रथमसंस्करण)। अर्वाचीन आधुनिक संस्कृत साहित्येर इतिहास। कलिकाता : पारुल प्रकाशनी।
6. चट्टोपाध्याय, ऋता। २०१२ (प्रथमसंस्करण)। आधुनिक संस्कृत साहित्येर इतिहास। कलिकाता : प्रग्रेसिभ पाबलिसार्स।
7. चट्टोपाध्याय, ऋता। २०१८ (प्रथमसंस्करण)। आधुनिक संस्कृत काव्य : वाङ्गाली मनीषा शतवर्षेर आलोके। कलिकाता : संस्कृत-पुस्तक-भाण्डार।
8. चट्टोपाध्याय, ऋता। २०१३ (प्रथमसंस्करण)। हरिदास सिद्धान्तवागीशेर सारस्वत साधना। कलिकाता : संस्कृत साहित्य परिषद ओ संस्कृत पुस्तक भाण्डार।
9. चक्रवर्ती, ध्यानेश नारायण। १९३८ (प्रथमसंस्करण)। विश्वेश्वर विद्याभूषण एकटि गार्हस्थ्यजीवन। दत्तपुकुर : ऋषिधाम।
10. ठाकुर, रवीन्द्रनाथ। १३८२ वङ्गाब्द (द्वितीयसंस्करण)। वाल्मीकिप्रतिभा। सम्पा. दीनेन्द्रनाथठाकुर। वीरभूम : विश्वभारतीग्रन्थविभाग।
11. चौधुरी, दर्शन। २०१६ (तृतीयसंस्करण)। नाट्यव्यक्तित्व वादल सरकार। कलिकाता : एकुश शतक।
12. वन्द्योपाध्याय, सुरेशचन्द्र। १९६२ (प्रथमसंस्करण)। संस्कृत काव्यचर्चाय वाङ्गालीर दान। कलिकाता : संस्कृत-पुस्तक-भाण्डार।
13. वसु, राजशेखर। १३९४ वङ्गाब्द (दशमसंस्करण)। महाभारत। कलिकाता : एम् सि सरकार एण्ड प्राइभेट लि.।
14. मुखोपाध्याय, अञ्जलिका। संस्कृत काव्यचर्चाय वाङ्गाली (सेकाल ओ एकाल) । कलिकाता : संस्कृतपुस्तकभाण्डार, २०१३ (प्रथमसंस्करण)।
15. राय, शिप्रा। आधुनिक संस्कृत साहित्येर संक्षिप्त इतिवृत्त। कलिकाता : संस्कृत-वुक्-डिपो, २०१७ (प्रथमसंस्करण)।